तुम्प्यम्, तुम्प्यम्, तुतुम्पिष्यम्, तोतुप्यम्;
ईषत्तुम्पः-दुस्तुम्पः-सुतुम्पः; — —
तुप्यमानः, तुम्प्यमानः, तुतुम्पिष्यमाणः, तोतुप्यमानः;
तुम्पः, [1]प्रस्तुम्पः-तुम्पः, तुतुम्पिषः, तोतुपः;
तुम्पितुम्, तुम्पयितुम्, तुतुम्पिषितुम्, तोतुपितुम्;
तुम्पा, तुम्पना, तुतुम्पिषा, तोतुपा;
तुम्पनम्, तुम्पनम्, तुतुम्पिषणम्, तोतुपनम्;
[2]तुम्पित्वा, तुम्पयित्वा, तुतुम्पिषित्वा, तोतुपित्वा;
प्रतुप्य, प्रतुम्प्य, प्रतुतुम्पिष्य, प्रतोतुप्य;
तुम्पम् २, तुम्पित्वा २, } तुम्पम् २, तुम्पयित्वा २, } तुतुम्पिषम् २, तुतुम्पिषित्वा २, } तोतुपम् २; तोतुपित्वा २. }

(743) "तुन्प हिंसार्थः" (VI-तुदादिः-1310. सक. सेट्. पर.)

'शपि तोपति हिंसायां तत्रैव तुपतीति शे॥' (श्लो. 138)

'तत्रैव शशपोस्तुम्पेद्, अर्दने तुम्पयेण्णिचि।' (श्लो. 139) इति देवः।

[A]तुम्पकः-म्पिका, तुम्पकः-म्पिका, तुतुम्पिषकः-षिका, तोतुपकः-पिका; तुम्पिता-त्री, तुम्पयिता-त्री, तुतुम्पिषिता-त्री, तोतुपिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकतुन्पधातुवत् (742) ज्ञेयानि। अस्य धातोः तुदादित्वात् शतरि—'तुदादिभ्यः शः' (3-1-77) इति शः विकरणप्रत्ययः। तस्य 'सार्वधातुकमपित्' (1-2-4) इति ङिद्वद्भावेन 'अनिदिताम्—' (6-4-24) इति धातोरुपधाभूतस्य नकारस्य शप्रत्यये परतः लोपेऽपि 'शे तृम्फादीनाम्' (वा. 7-1-59) इति वचनेन नुमि तुम्पन् इत्येव रूपम्।

---

1. 'प्रात् तुम्पतौ गवि कर्तरि' (ग. सू. 6-1-157) इति पारस्करादिषु पाठात् प्रपूर्वकादस्मात् गवि कर्तरि सुट्। एवं 'प्रस्तुम्पन् गौः वर्तते' इत्यादिष्वपि सुट् ज्ञेयः।

2. 'न क्त्वा सेट्' (1-2-18) इति कित्त्वनिषेधात् उपधानकारलोपो न।

A. 'शत्रूल्लोभकरेफरीढितृपिता तृम्फाय तोपार्थिनो
राज्ञा नित्यमतुम्फतान् वितुफती बन्धूंश्च सन्तुम्फती' धा. का. 2.74.